एकादशः पाठः

# अमरवाणी संस्कृतभाषा




''भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती''

भो छात्राः! श्रावणमासस्य द्वादशीतः भाद्रपदमासस्य तृतीयापर्यन्तं संस्कृतसप्ताहः भवति। अद्य श्रावणीपूर्णिमा अस्ति। किं भवन्तः जानन्ति? अद्य संस्कृतदिवसः अपि आयोज्यते। संस्कृतभाषा अतिप्राचीना अस्ति। दैवीयप्रेरणया उत्पन्ना अतः इयं भाषा देवभाषा इति कथ्यते। सम्पूर्णे अपि विश्वे आदिज्ञानस्य आधाराः ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदः इति चतुर्वेदाः तथा शिक्षा, कल्पः, ज्योतिषं, छन्दः, व्याकरणं, निरुक्तम् इति षड् वेदाङ्गानि अष्टोत्तरशतम् उपनिषदः षड् दर्शनानि अष्टादश पुराणानि चिकित्सानाट्यसाहित्य-शास्त्रादयः ग्रन्थाः च संस्कृतभाषायाम् एव लभ्यन्ते। पुरा संस्कृतभाषा जनभाषा आसीत्, अधुना अपि प्रासङ्गिकी अस्ति। संस्कृतस्य महत्त्वं विविधकारणैः अस्ति। यथा–

1. **आध्यात्मिकं महत्त्वम्–** आध्यात्मिकज्ञानेन भारतं जगद्गुरुः आसीत्। श्रीमद्भगवद्गीतादिभारतीयधर्म-दर्शनग्रन्थेषु गूढरहस्यानि दैवीयतत्त्वानि निहितानि। भौतिकजगति आध्यात्मिकशान्तिनिमित्तं वैदेशिकाः अपि भारतीयदर्शनस्य अध्ययनं कुर्वन्ति।

2. **सांस्कृतिकं महत्त्वम्–** ''भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा।'' तत्रापि ''संस्कृतिः संस्कृताश्रिता'' इति उच्यते। चत्वारः पुरुषार्थाः, चत्वारः आश्रमाः, षोडश संस्काराः, स्त्रीसमादरादयः, सदाचारविचाराः धर्मपुराणस्मृतिग्रन्थेषु संस्कृतभाषायाम् एव प्रतिपादिताः।

3. **साहित्यिकं महत्त्वम्–** संस्कृतभाषायाम् आदिकविवाल्मीकिम् आरभ्य विष्णुशर्माकालिदास-भारविमाघदण्डिभर्तृहरिजयदेवादीनां वैविध्यपूर्णकवीनां विश्वप्रसिद्धा समृद्धपरम्परा अस्ति। एतेषां कृतिषु गद्यपद्यनाट्यकाव्यगीतिनीतिस्तोत्रकथासाहित्यस्य भण्डारः दृश्यते।

4. **वैज्ञानिकं महत्त्वम्–** विज्ञानस्य विभिन्नक्षेत्रेषु भारतीयवैज्ञानिकैः पाणिनि-पतञ्जलि-कणाद-आर्यभट्ट-वराहमिहिर-भास्कराचार्यादिभिः संस्कृते लिखिताः ग्रन्थाः अद्यापि विश्वस्य मार्गदर्शनं कुर्वन्ति। भाषाविज्ञानदृष्ट्या अपि सुदृढसुबद्धव्याकरणकारणात् सङ्गणकाय अस्याः भाषायाः उपयोगिता उद्घोषिता। समस्तभारतीयभाषाणां जनन्याः संस्कृतभाषायाः प्रभावः अन्यवैदेशिकभाषासु अपि दृश्यते। समृद्धशब्दभण्डारकारणात् आधुनिकप्राविधिकक्षेत्रे पारिभाषिकशब्दानुवादसमये संस्कृतस्य एव साहाय्यं स्वीक्रियते।

न केवलम् एतानि कारणानि अपि तु संस्कृतं सम्पूर्णं राष्ट्रम् एकसूत्रेण बध्नाति।

अस्याः भाषायाः ऐतिहासिक-सामाजिक-राष्ट्रिय-अन्ताराष्ट्रियक्षेत्रेषु अपि महत्त्वम् अस्ति। एतस्याः महत्त्वं ज्ञात्वा इदानीं सर्वकारः अपि पुनः जनभाषां कर्तुं 1999–2000 वर्षं 'संस्कृतवर्षम्' इति उद्घोष्य संस्कृतस्य प्रचारप्रसारे संलग्नः अस्ति। भारते इदानीं पञ्चदश संस्कृतविश्वविद्यालयाः सन्ति। सर्वे प्रायः चिन्तयन्ति यत् संस्कृतं कठिनम् इति; किन्तु वस्तुतः एषा सरला सरसा सुबोधजनभाषा अस्ति। अतः कर्णाटके 'मत्तूर ग्रामे' मध्यप्रदेशे 'झीरिग्रामे' च जनाः संस्कृतेन वदन्ति। इदानीम् अस्माभिः अपि संस्कृतं पठित्वा अस्याः भाषायाः प्रसाराय प्रयत्नः करणीयः।

## शब्दार्थाः

| | | | | | |
|---|---|---|---|---|---|
| गीर्वाणभारती | = | संस्कृत भाषा (देवभाषा) | दैवीयप्रेरणया | = | देवों की प्रेरणा से |
| प्रासङ्गिकी | = | समयानुकूल | पुरा | = | प्राचीनकाल में |
| अधुना | = | वर्तमान में/अभी | प्राविधिकक्षेत्रम् | = | तकनीकी क्षेत्र |
| स्वीक्रियते | = | ली जाती है। | सर्वकारः | = | सरकार |
| उद्घोष्य | = | उद्घोषणा करके | करणीयः | = | करना चाहिए |

## अभ्यासः

1. **एकपदेन उत्तरं लिखत–**

(क) का भाषा 'देवभाषा' इति कथ्यते?

(ख) कदा संस्कृतदिवसः आयोज्यते?

(ग) आदिज्ञानस्य आधाराः के?

(घ) किं वर्षं संस्कृतवर्षम्?

(ङ) भारतस्य द्वे प्रतिष्ठे के?

(च) का भाषा सम्पूर्णं राष्ट्रम् एकसूत्रेण बध्नाति?

**2. एकवाक्येन उत्तरं लिखत–**

(क) संस्कृतभाषायाः पञ्चकवीनां नामानि लिखत?

(ख) गूढरहस्यानि दैवीयतत्त्वानि कुत्र निहितानि?

(ग) कस्मात् कारणात् सङ्गणकाय संस्कृतम् उपयुक्तम्?

(घ) कयोः ग्रामयोः जनाः संस्कृतेन वदन्ति?

(ङ) धर्मपुराणस्मृतिग्रन्थेषु किं किं प्रतिपादितम्?

(च) चत्वारः वेदाः के?

**3. रेखाङ्कितपदानाम् आधारेण प्रश्ननिर्माणं कुरुत–**

(क) श्रावणीपूर्णिमायां संस्कृतदिवसः आयोज्यते।

(ख) पुरा संस्कृतभाषा जनभाषा आसीत्।

(ग) आध्यात्मिकज्ञानेन भारतं जगद्गुरुः आसीत्।

(घ) समस्तभारतीयभाषाणां जननी संस्कृतम्।

(ङ) भारते पञ्चदश संस्कृतविश्वविद्यालयाः सन्ति।

**4. उचितं मेलनं कुरुत–**

| | (अ) | (ब) |
|---|---|---|
| (क) | वेदाः | झीरिग्रामः |
| (ख) | वेदाङ्गानि | 1999–2000 |
| (ग) | दर्शनानि | 4 (चत्वारः) |
| (घ) | उपनिषदः | 6 (षट्) |
| (ङ) | पुराणानि | 6 (षट्) |
| (च) | संस्कृतवर्षम् | 18 (अष्टादश) |
| (छ) | आदिकविः | 108 (अष्टोत्तरशतम्) |
| (ज) | संस्कृतग्रामः | वाल्मीकिः |

**5. कोष्ठकात् उचितपदं चित्वा रेखाङ्कितपदैः प्रश्ननिर्माणं कुरुत–**

(कस्याः, केषाम्, कीदृशी, कस्य)

(क) आर्याणां भाषा संस्कृतभाषा आसीत्।

(ख) भोजस्य राज्ये सर्वे जनाः संस्कृतभाषायाम् एव वदन्ति स्म।

(ग) आङ्गलभाषायाः कतिपयेषु शब्देषु संस्कृतभाषायाः प्रभावः दृश्यते।

(घ) बाणभट्टस्य कादम्बरी अपि संस्कृतभाषायाः उत्कृष्टा कृतिः अस्ति।

6. **उचितपदेन रिक्तस्थानं पूरयत–**

(संस्कृतभाषायाः, संस्कृतभाषायाः, संस्कृतभाषाम्, संस्कृतभाषा)।

क) जनाः ................ वदन्ति।

ख) .................... देववाणी कथ्यते।

ग) ................... विकासः आवश्यकः अस्ति।

घ) भारतीयभाषाणाम् उद्गमः ................ एव अभवत्।

7. **उचितम् अव्ययपदं चित्वा कथां पूरयत–**

(सत्वरं, पुरा, इति, अन्तः, मन्दं-मन्दं, बहिः, एकदा, शीघ्रं, उच्चैः, उपरि, शनैः शनैः, परितः, पुरतः)

........... काले एकस्मिन् वने बहवः पशुपक्षिणः निवसन्ति स्म। ........... वनस्य ........... नूतनवर्षस्य सभा आसीत्। शशकः कच्छपं ........... आगच्छतु ........... उक्त्वा ........... सभां गतवान्। स्थूलः गजः ........... ........... आगतः। मूषकः बिलात् ........... आगत्य सभां गतः। सर्वे पशुपक्षिणः आगत्य मञ्चस्य ........... उपविष्टाः। सभास्थलं ........... वानराः आसन्। सिंहः ........... गर्जनं कृत्वा मञ्चस्य ........... उपविष्टः। सिंहः भाषणं दत्वा शुभकामनाः दत्तवान्। सर्वे मिष्टान्नं खादितवन्तः कच्छपः ........... ........... विलम्बेन आगतवान्। तं दृष्ट्वा सर्वे हसितवन्तः।

## योग्यताविस्तारः –

- **स्मरतु–**

| **कविः/लेखकः** | **कृतिः** | **कविः/लेखकः** | **कृतिः** |
|---|---|---|---|
| वाल्मीकिः | रामायणम् | वेदव्यासः | महाभारतम् |
| कालिदासः | अभिज्ञानशाकुन्तलम् | बाणभट्टः | कादम्बरी |
| चाणक्यः/कौटिल्यः | अर्थशास्त्रम् | नारायणपण्डितः | हितोपदेशः |
| विष्णुशर्मा | पञ्चतन्त्रम् | पाणिनिः | अष्टाध्यायी |
| पतञ्जलिः | महाभाष्यम् | भरतमुनिः | नाट्यशास्त्रम् |
| भासः | स्वप्नवासवदत्तम् | भारविः | किरातार्जुनीयम् |
| भर्तृहरिः | नीतिशतकम् | माघः | शिशुपालवधम् |
| जयदेवः | गीतगोविन्दम् | श्रीहर्षः | नैषधीयचरितम् |
| शङ्कराचार्यः | सौन्दर्यलहरी, कनकधारास्तोत्रम् | | |

- **प्रमुखध्येयवाक्यानि अवधानेन पठत स्मरणं च कुरुत–**

| ध्येयवाक्यम् | विभागः |
|---|---|
| सत्यमेव जयते | भारतसर्वकारः |
| सत्यं शिवं सुन्दरम् | दूरदर्शनम् |
| बहुजनहिताय | आकाशवाणी |
| यतोधर्मस्ततोजयः | सर्वोच्चन्यायालयः |
| नभः स्पृशं दीप्तम् | वायुसेना |
| योगक्षेमं वहाम्यहम् | जीवनबीमानिगमः |
| अहर्निशं सेवामहे | डाकतारविभागः |
| धर्मचक्रप्रवर्तनाय | लोकसभा |
| श्रम एव जयते | श्रममन्त्रालयः |

*भारते भातु भारती।*